# Shri Acharyaparampara Stotram

# શ્રીઆચાર્યપરમ્પરાસ્તોત્રમ્

## Document Information

Text title : Shri Acharyaparampara Stotram

File name : AchAryaparamparAstotram.itx

Category : deities_misc, gurudev, nimbArkAchArya, panchaka

Location : doc_deities_misc

Proofread by : Mohan Chettoor

Latest update : January 7, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 7, 2023

*sanskritdocuments.org*

# શ્રીઆચાર્યપરમ્પરાસ્તોત્રમ્

શ્રીહંસં સનકાદિકં મુનિવરં વીણાધરં નારદં
શ્રીમન્નિમ્બદિવાકરાર્યકમહં શ્રીશ્રીનિવાસં ભજે ।
વિશ્વાર્ય્યપુરુષોત્તમઞ્ચભવહન્ શ્રીમદ્વિલાસાસ્વરૂ-
પાચાર્ય્યં કિલમાધવં ચ વલયુક્ભદ્રં ચ પદ્માર્પકમ્ ॥ ૧॥

વન્દે શ્યામકગોપપાલકકૃપાન્, દેવાર્યકં સુન્દરં
પદ્મોપેન્દ્રક-રામચન્દ્રકભટાન્ શ્રીવામનં કૃષ્ણકમ્ ।
પદ્માભં શ્રવણઞ્ચ ભૂરિભટકં શ્રીમાધવં શ્યામલં
ગોપાલં વલભદ્રગોપિવરદં શ્રીકેશવં ગાઙ્ગલમ્ ॥ ૨॥

કાશ્મીરીયુતકેશવં ભટમહં શ્રીભટ્ટદેવં ભજે
શ્રીવ્યાસં હરિમધ્યગઞ્ચવરદં શ્રીપરશુરામામિધમ્ ।
વન્દે શ્રીહરિવંશદેવચરણં નારાયણાર્ય્યં ભજે
શ્રીવૃન્દાવનદેવપાદશરણં ગોવિન્દદેવં ભજે ॥ ૩॥

ગોવિન્દં પ્રણમામિ દેવ શરણં શૈલીનવીનાઙ્કુરં
લોકે ખ્યાતિ વિધાયકં ગુરુવરં સર્વેશ્વરાર્ય્યં ભજે ।
શ્રીનિમ્બાર્કપદં સદેવશરણં નિત્યં નુમશ્ચેતસા
વન્દે શ્રીવ્રજરાજપાદશરણં દેવાન્તનામામિધમ્ ॥ ૪॥

શ્રીગોપેશ્વરપાદપદ્મયુગલં નૌમિ પ્રલોભાન્તકં
પીઠં યેન વિનિર્મિતં સુરુચિરં કુણ્ડં પયોધીકૃતમ્ ।
રાધામાધવપાદલોલુપઘનશ્યામાર્યપાદં પુનઃ
દેવાચાર્યકસંજ્ઞકં શરણયુક્શ્રીબાલકૃષ્ણામિધમ્ ॥ ૫॥

વેદવેદાન્તતત્ત્વજ્ઞમિષ્ટારાધનમાનસમ્ ।
રાધાસર્વેશ્વરાધ તં શરણાન્તં નમામ્યહમ્ ।

ઇતિ શ્રીઆચાર્યપરમ્પરાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

*Shri Acharyaparampara Stotram*

pdf was typeset on January 7, 2023

Please send corrections to *sanskrit@cheerful.com*